# आदर्श-प्रश्नपत्रम्
## संस्कृतम् ( केन्द्रिकम् )
## कक्षा - दशमः ( X )

**समय- होरात्रयम्** **पूर्णाङ्काः-100**

### खण्डः - क ( पाठ्यपुस्तकम् )

**1. अधोलिखितम् अनुच्छेदं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत–**

कश्चिद् राजा स्वमनसि निरन्तरं प्रवर्तमानाया:जिज्ञासाया: समाधानाय कश्मिंश्चिदाश्रमे निवसतो मुनेः पार्श्वमुपागच्छत् तं मुनिं च प्रश्नत्रयमपृच्छत् कः समयः श्रेष्ठः? कः पुरुषः श्रेष्ठः? किञ्च कर्म श्रेष्ठम्?

मुनिः उवाच - सः समयः श्रेष्ठः यस्मिन् मानवः परोपकारे व्यापृतः, कस्यापि सहायतां कामयमानः समक्षं वर्तमानः पुरुषः एव श्रेष्ठः , श्रेष्ठं कर्म च तद् येन हृदयपरिवर्तनमपि जायते । राजा मुनेरुत्तरप्रदानपद्धत्या प्रमुदितः भूत्वा स्वनगरं गतः।

**( *i* ) अधोलिखितयो प्रश्नयोः उत्तरं लिखत-** **1 + 2 = 3**

(क) राजा कुत्र आगच्छत्?

(ख) राजा किमर्थं मुनेः पार्श्वम् उपागच्छत्?

**( *ii* ) अधोलिखितपदानां समानार्थकपदानि गद्यांशात् चित्वा लिखत-** **½ × 2 = 1**

(क) ज्ञातुम् इच्छा (ख) प्रसन्नः

**2. अधोलिखितं श्लोकं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-**

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिता।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः।।

**( *i* ) अधोलिखिततानां प्रश्नानाम् उत्तरं लिखत-** **1 + 2 = 3**

(क) पशुनापि किं गृह्यते?

(ख) पण्डितः जनः किं बुध्यति?

**( *ii* ) "उदीरितः अर्थः अनयोः पदद्वयोः विशेषणपदं किमस्ति? लिखत।** **1**

**( *iii* ) विलोमपदं लिखत-** **½ × 2 = 1**

(क) मूर्खः (ख) उक्तम्

**( *iv* ) "हयाश्च नागाश्च वहन्ति बोधिता"–वाक्येऽस्मिन् क्रियापदं किमस्ति? लिखत।** **1**

**3. अधोलिखितं नाट्यांशं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-**

चन्दनदासः–जयतु आर्यः।

चाणक्यः–श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां बृद्धिलाभाः?

चन्दनदासः–(आत्मगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्)

अथ किम्? आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

चाणक्यः–भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः–आज्ञापयतु आर्यः किं कियत् च अस्मज्जनादिष्यते इति।

www.questionbodh.com

(*i*) **संस्कृतभाषया प्रश्नान् उत्तरत–** **1 + 1 + 2 = 4**

(क) अस्मिन् नाट्यांशे कयोः मध्ये वार्ता प्रचलति?

(ख) चन्दनदासः केन कारणेन चाणक्यं प्रति शङ्कां करोति?

(ग) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः इत्युक्ते चन्दनदासः किं कथयति?

(*ii*) **अधोलिखितयोः पदयोः समानार्थकपदं नाट्यांशात् चित्वा लिखत–** **½ × 2 = 1**

(क) वृद्धिं प्राप्नुवन्ति (ख) वाणिज्यम्

(*iii*) **"अखण्डिता वणिज्या अनयोः पदद्वयोः विशेष्यपदं चित्वा लिखत।** **1**

**4. कयोश्चित् द्वयोः हिन्दीभाषया आङ्गलभाषया वा भावार्थं लिखत–** **3 + 3 = 6**

(क) एकदा सा कावेरीतीरपत्तने विगलितसमृद्धिं, विरलभूषणां कुमारीमपश्यत्। तस्या अतुलित-रूप-सम्पदाभिभूतः शक्तिकुमारः अचिन्तयत् सेयमाकृतिर्न शील- विरोधिनी।

(ख) श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता ।
आरोग्यं चापि परमं व्यायामादुपजायते ।।

(ग) कुशलवौ – (रामस्य समीपम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः – युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एवं न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

**5. कयोश्चित् द्वयोः हिन्दीभाषया आङ्गलभाषया वा सप्रसङ्गं व्याख्यां कुरुत–** **4 × 2 = 8**

(क) अद्याशनं शिशुजनस्य बलेन जातं
श्वो वा कथं नु भवितेति विचिन्तयन्ती।
इत्यश्रुपात मलिनीकृतगण्डदेशा
नैच्छद् दरिद्रगृहिणी रजनीविरामम्।।

(ख) निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै
कथं जनस्तं परितोषयन्ति।।

(ग) रामः-अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि न युक्तं च स्त्रीगतमनुयोक्तुम् विशेषस्तपोवने। तत्र कोऽत्राभ्युपायः?

**6. अधोलिखितस्य श्लोकस्य अन्वयं कुरुत–** **2**

आश्वास्य पर्वतकुलं तपनोष्णतप्त-
मुद्दामदावविधुराणि च काननानि।
नानानदीनदशतानि च पूरयित्वा।
रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्री।

**7. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत–** **1 × 5 = 5**

(*i*) त्वम् मानुषात् विभेषि?

(*ii*) गात्राणां सुविभक्तता व्यायामेन संभवति।

(*iii*) सा कन्या अतिथिं स्नानाय प्रेरितवती।

(*iv*) महानगरेषु वाहनानाम् अनन्ताः पंक्तयः धावन्ति।

(*v*) व्यायामः गुणैः हीनम् अपि सुदर्शनं करोति।

www.questionbodh.com

**8. अधोलिखितवाक्यानि घटनाक्रमानुसारं लिखत–** **½ × 8 = 4**

(*i*) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।
(*ii*) प्रत्युत्पन्नतिः सा श्रृगालम् आक्षिपन्ती उवाच।
(*iii*) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् अगच्छत्।
(*iv*) मार्गे सा एकं व्याघ्रम् अपश्यत्।
(*v*) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच–अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।
(*vi*) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।
(*vii*) त्वं व्याघ्रत्रयम् आनेतुं प्रतिज्ञाय एकमेव आनीतवान्।
(*viii*) गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।

**9. स्वकीयेन स्मरणेन पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य अर्थमपि लिखत। (यः प्रश्नपत्रेऽस्मिन् नास्ति)** **1 + 2 = 3**

**अथवा**

**गुणवती कन्या कथायाः सारांशं स्वभाषया लिखत।**

**10. अधोलिखितानि पदानि प्रयुज्य संस्कृतेन वाक्यानि रचयत–** **1 × 3 = 3**

(*i*) शिशवः (*ii*) भानुः (*iii*) सलिलम्

**11. शुद्धं विकल्पं चित्वा रिक्तस्थानपूर्तिं कुरुत–** **½ × 4 = 2**

(*i*) अस्ति द्रविडेषु ...................... नाम नगरी (कञ्चनपुर/काञ्ची)
(*ii*) अत्रं जीवितं ...................... जातं, प्रकृतिः एव शरणम् अस्ति। (सुखावहं/दुर्वहम्)
(*iii*) वायुमण्डलं अद्य ...................... दूषितम्। (भृशम्/अल्पम्)
(*iv*) ...................... सदृशं किञ्चित् स्थौल्यापकर्षकं नास्ति। (व्यायामेन/भोजनेन)

www.questionbodh.com

## खण्डः – ख (व्याकरणम्)

**1. (क) अधोलिखतेषु सन्धिं कुरुत–** **1 + 1 = 2**

(*i*) अन्य + अपि (*ii*) कः + चित्

**(ख) सन्धिविच्छेदं कुरुत–** **1 + 1 + 1 = 3**

(*i*) पितुर्गृहम् = .................... + ....................
(*ii*) शिशवस्तु = .................... + ....................
(*iii*) जानाम्यहम् = .................... + ....................

**2. कोष्ठकेषु दत्तेषु पदेषु यथानिर्दिष्टां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–** **1 + 1 + 1 = 3**

(*i*) व्यायामः .................... हीनमपि सुदर्शनं करोति। (गुण–शब्दे तृतीया)
(*ii*) मोहनः .................... प्रति गच्छति। (गृह–शब्दे द्वितीया)
(*iii*) सूपकारः .................... भोजनं जिघ्रति। (नासिका–शब्दे तृतीया)

**3. विकल्पेषु शुद्धं विकल्पं चित्वा रिक्तस्थानपूर्तिं कुरुत–** **1 + 1 + 1 = 3**

(*i*) अहं प्रकृतेः शोभां .................... । (पश्यसि/पश्यामि/पश्यति)
(*ii*) समग्रं भारतम् उल्लासे मग्नः .................... । (आसीत्/आसन्/आस्ताम्)
(*iii*) छात्राः द्राक्षारसं .................... । (पिबति/पिबन्ति/पिबामि)

**4. मञ्जूषायाः उचित-अव्ययपदं चित्वा रिक्तस्थानपूर्तिं कुरुत-** **1 + 1 + 1 + 1 = 4**

| **शनैः शनैः, श्वः, सर्वत्र, अन्यथा** |
|---|

(*i*) ईश्वरः .................. अस्ति।

(*ii*) परिश्रमं कुरु .................. असफलः भविष्यसि।

(*iii*) सः सर्वं कार्यं .................. करोति।

(*iv*) अहं .................. वाराणसीं गमिष्यामि।

**5. (क) प्रकृति-प्रत्ययविभागं कुरुत-** **1 + 1 + 1 = 3**

(*i*) स्मरणीयः =

(*ii*) सरलता =

(*iii*) दैनिक =

**5. (ख) प्रकृति-प्रत्ययं योजयत-** **1 + 1 = 2**

(*i*) लोभ + णिनि =

(*ii*) आस् + ल्युट् =

**6. कोष्ठकेषु दत्तेषु विकल्पेषु शुद्धं विकल्पं विचित्य रिक्तस्थानपूर्तिं कुरुत-** **1 × 5 = 5**

(*i*) .................. परितः सैनिकाः सन्ति। (देशस्य/देशम्/देशे)

(*ii*) पुत्रः .................. सह गच्छति। (जनकेन/जनकस्य/जनकाय)

(*iii*) धनिकः .................. धनं यच्छति। (निर्धनम्/निर्धनाय/निर्धने)

(*iv*) कृषकाः .................. आगच्छन्ति। (क्षेत्रेण/क्षेत्रम्/क्षेत्रात्)

(*v*) माता .................. स्निह्यति (पुत्रम्/पुत्रस्य/पुत्रे)

**अथवा**

**कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत-**

(*i*) .................. फलं रोचते। (बालक)

(*ii*) छात्रः .................. लिखति। (लेखनी)

(*iii*) गृहिणी .................. भोजनं ददाति। (याचक)

(*iv*) उदिते .................. तमः नश्यति। (सूर्य)

(*v*) आरक्षी .................. निर्बलं रक्षति। (दुर्जन)

**7. (क) अधोलिखितानां पदानां समस्तपदं लिखत-** **1 × 3 = 3**

(*i*) शक्तिम् अनतिक्रम्य

(*ii*) नीलः कण्ठः यस्य सः

(*iii*) ग्रामस्य समीपम्

**(ख) विग्रहं लिखत-** **1 × 2 = 2**

(*i*) नीलोत्पलम् =

(*ii*) मुग्धमतिः =

## खण्डः - ग ( रचनात्मकं कार्यम् )

**1. रुग्णतावशात् विद्यालयं प्राप्तुं असमर्थः त्वम् दिनत्रयस्य अवकाशाय प्रधानाचार्यं प्रति आवेदनपत्रं लिखत। 5**

**अथवा**

**शैक्षिकभ्रमणाय नैनीतालं गन्तुकामः त्वम् एकसहस्त्ररूप्यकाणि प्राप्तुं पितरं प्रति पत्रं लिखत।**

**2. ( मैट्रोयान/जनसंख्यावृद्धि ) चित्राधारितं पञ्चवाक्यानां रचनां कुरुत। 5**

**अथवा**

**पुस्तकमेलापकस्य वर्णनं कुर्वन् पञ्चवाक्यानि लिखत।**

**3. अधोलिखितं गद्यांशं पठित्वा अधःदत्तान् प्रश्नान् उत्तरत-**

विद्या मनुष्यस्य सर्वश्रेष्ठं धनम् अस्ति। इयम् अस्माकं दुर्व्यसनं दूरीकरोति, अज्ञानताम् अपनयति, उचितानुचितयोः ज्ञानं च कारयति। विदेशगमने इयम् बन्धुवत् कार्यं करोति। विद्यया वयम् उच्चपदं विन्दामः। एषा सन्मार्गे चलितुं प्रेरयति। विद्यया वयं धनं, मानं यशः च प्राप्नुमः।

**( क ) अधोलिखितप्रश्नस्य उत्तरं संस्कृतभाषया लिखत- 1 × 1 = 1**

(*i*) का उचितानुचितयोः ज्ञानं कारयति?

**( ख ) विद्यया वयं किं-किं प्राप्नुमः? लिखत। 1**

**( ग ) अपनपति इत्यस्य शुद्धम् अर्थं विकल्पेभ्यः चित्वा लिखत- 1**

(*i*) आनयानि (*ii*) कारयति (*iii*) दूरीकरोति (*iv*) प्रेरयति।

**( घ ) विन्दामः इत्यस्मिन् पदे को धातुः? 1**

**( ङ ) 'विद्यया' इति पदे का विभक्तिः अस्ति? 1**

**4. अधोलिखितवाक्यानां संस्कृतभाषया अनुवादं कुरुत- 1 × 5 = 5**

(*i*) बालक पिता के साथ बाजार जाता है।

(*ii*) मेरा घर विद्यालय के समीप है।

(*iii*) पेड़ से पत्ते गिरते हैं।

(*iv*) घर में अनेक वस्तुएँ हैं।

(*v*) विद्यालय के चारों ओर वृक्ष हैं।

**अथवा**

**अशुद्धिसंशोधनं कृत्वा वाक्यानि लिखत-**

(*i*) अहम् पाठं <u>पठिष्यति</u>।

(*ii*) <u>गृहस्य</u> उभयतः वृक्षौ स्तः।

(*iii*) <u>अध्यापकं</u> नमः।

(*iv*) सः <u>चरणस्य</u> खञ्जः अस्ति।

(*v*) बालकः <u>सिंहेन</u> विभेति।